# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (०७)

## ०६.११.२०१२

# पुनरावर्तनम्

- इत्वविकल्पः
- उदीचामातः स्थाने यकपूर्वायाः
- भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि
  - भस्त्रा – उपसर्जनस्यैव । निर्भस्त्रिका/ निर्भस्त्रका ।
  - एषा – कृतषत्वस्यैव, सपूर्वस्य न । एषिका / एषका ।
  - अजा, ज्ञा – केवलस्य, सपूर्वस्य च । अजका/अजिका । ज्ञका/ज्ञिका ।
  - द्वा – सपूर्वस्य न । द्वके/द्विके ।

- स्वशब्दग्रहणं संज्ञोपसर्जनार्थम् ।
- इह हि ‘आतः स्थाने’ इत्यनुवृत्तं स्वशब्दस्य आतो विशेषणम् ।
- न तु द्वैषयोः असम्भवात् ।
- नाप्यन्येषाम्, अव्यभिचारात् ।
- स्वशब्दस्तु अनुपसर्जनम् आत्मीयवाची अकजर्हः । अर्थान्तरे तु न स्त्री ।
- संज्ञोपसर्जनीभूतस्त्य् कप्रत्ययान्तत्वाद् भवत्युदाहरणम् ।
- एवं चात्मीयायां स्विका, परमस्विकेति नित्यमेव इत्वम् ।

प्रौढमनोरमायाम्
उक्तं च हरदत्तेन

अत्रातः स्थान इत्येतत्स्वशब्दस्य विशेषणम् ।
सम्भवव्यभिचारौ हि तत्र स्तः काकचोः सतोः ॥
द्वैषयोः सम्भवो नास्ति नान्यत्र व्यभिचारिता ।
सर्वनाम्नः स्वशब्दस्य तेन नायं विधिर्भवेत् ॥

# ४६७. अभाषितपुंस्काच्च (७.३.४८)

- पदद्वयम् । अभाषितपुंस्कात्, च ।
- 'प्रत्ययस्थात्..' (७.३.४४) इति, 'उदीचामातः..' (७.३.४६) इति च अनुवर्तते ।
- एतस्माद् विहितस्य आतः स्थाने अतः इद् वा स्यात् ।
- अभाषितपुंस्काच्च इति ।
- गङ्गका / गङ्गिका ।
- बहुव्रीहेः भाषितपुंस्कत्वात् ततो विहितस्य नित्यम् ।
- अज्ञाता अखट्वा अखट्विका ।
- बहुव्रीहेरिति ।

- शौषिके कपि तु विकल्प एव ।
- शौषिके कपि त्विति ।

# ४६८. आदाचार्याणाम् (७.३.४९)

- पदद्वयम् । आद्, आचार्याणाम् ।
- पूर्वसूत्रविषये आद् वा स्यात् ।
- गङ्गाका ।
- उक्तपुंस्कात्तु शुभ्रिका ।
- शुभ्रिकेति ।

# ४६९. अनुपसर्जनात् (४.१.१४)

- अधिकारोऽयम् ‘यूनस्तिः’ (४.१.७७) इत्यभिव्याप्य ।
- अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति ।
- यूनस्तिरित्यभिव्याप्येति ।
- अयमेवेति ।

# ४७०. टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्-ठक्ठञ्कञ्क्वरपः (४.१.१५)

- एकपदात्मकं सूत्रम् । टित्-ढ-अण्-अञ्-द्वयसच्-दघ्नच्-मात्रच्-तयप्-ठक्-ठञ्-कञ्-क्वरपः ।
- 'ङ्याप्प्रातिपदिकात्' (४.१.१) इति, 'स्त्रियाम्' (४.१.३) इति, 'अनुपसर्जनात्' (४.१.१४) इति च अधिक्रियन्ते । 'अजाद्यतष्टाप्' (४.१.४) इत्यतः 'अतः' इति, 'ऋन्नेभ्यो ङीप्' (४.१.५) इत्यतः 'ङीप्' इति च अनुवर्तते ।
- अनुपसर्जनं यत् टिदादि, तदन्तं यद् अदन्तं प्रातिपदिकं, ततः स्त्रियां ङीप् स्यात् ।
- टिड्ढाणञ् इति ।